# Shri Shanmukhabhujangastutih

# श्रीषण्मुखभुजङ्गस्तुतिः

## Document Information

Text title : Shri Shanmukhabhujangastutih

File name : ShaNmukhabhujangastutiH.itx

Category : subrahmanya, chandrashekharabhAratI, bhujanga

Location : doc_subrahmanya

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# श्रीषण्मुखभुजङ्गस्तुतिः

श्रीजगद्गुरु शृङ्गेरी
श्रीचन्द्रशेखरभारतीस्वामि अनुगृहीता

ह्रिया लक्ष्म्या वल्या सुरपृतनयाऽऽलिङ्गिततनुः
मयूरारूढोऽयं शिववदनपङ्केरुहरविः ।
षडास्यो भक्तानामचलहृदि वासं प्रतनवा
इतीमां बुद्धिं द्रागचलनिलयः सञ्जनयति ॥ १॥

स्मितन्यक्कृतेन्दुप्रभाकुन्दपुष्पं
सिताभ्रागरुप्रष्ठगन्धानुलिप्तम् ।
श्रिताशेषलोकेष्टदानामरद्रुं
सदा षण्मुखं भावये हृत्सरोजे ॥ २॥

शरीरेन्द्रियादावहम्भावजातान्
षडूर्मीर्विकारांश्च शत्रून्निहन्तुम् ।
नतानां दधे यस्तमास्याब्जषट्कं
सदा षण्मुखं भावये हृत्सरोजे ॥ ३॥

अपर्णाख्यवल्लीसमाश्लेषयोगात्
पुरा स्थाणुतो योऽजनिष्टामरार्थम् ।
विशाखं नगे वल्लिकालिङ्गितं तं
सदा षण्मुखं भावये हृत्सरोजे ॥ ४॥

गुकारेण वाच्यं तमो बाह्यमन्तः
स्वदेहाभया ज्ञानदानेन हन्ति ।
य एनं गुहं वेदशीर्षैकमेयं
सदा षण्मुखं भावये हृत्सरोजे ॥ ५॥

यतः कर्ममार्गो भुवि ख्यापितस्तं
स्वनृत्ये निमित्तस्य हेतुं विदित्वा ।

वहत्यादरान्मेघनादानुलासी
    सदा षण्मुखं भावये हृत्सरोजे ॥ ६॥

कृपावारिराशिर्नृणामास्तिकत्वं
    दृढं कर्तुमद्यापि यः कुक्कुटादीन् ।
भृशं पाचितान्जीवयन् राजते तं
    सदा षण्मुखं भावये हृत्सरोजे ॥ ७॥

भुजङ्गप्रयातेन वृत्तेन क्लृप्तां
    स्तुतिं षण्मुखस्यादराद्ये पठन्ति ।
सुपुत्रायुरारोग्यसम्पद्विशिष्टान्
    करोत्येव तान् षण्मुखः सद्विदग्र्यान् ॥ ८॥

इति श्रीजगद्गुरु श्रीशृङ्गेरीपीठाधिप श्रीचन्द्रशेखरभारती
    श्रीपादैः विरचिता षण्मुखभुजङ्गस्तुतिः समाप्ता ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shri Shanmukhabhujangastutih*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*